श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमद्भागवते प्रथमस्कन्धे

# ॥ श्री भीष्मस्तुतिः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

# ॥ श्री भीष्मस्तुतिः ॥

श्रीभीष्म उवाच

इति मतिरुपकल्पिता वितृष्णा
भगवति सात्वतपुङ्गवे विभूम्नि।
स्वसुखमुपगते क्वचिद्विहर्तुं
प्रकृतिमुपेयुषि यद्भवप्रवाहः ॥ 1 ॥

त्रिभुवनकमनं तमालवर्णं
रविकरगौरवराम्बरं दधाने।
वपुरलककुलावृताननाब्जं
विजयसखे रतिरस्तु मेऽनवद्या ॥ 2 ॥

युधि तुरगरजोविधूम्रविष्वक् -
कचलुलितश्रमवार्यलङ्कृतास्ये।
मम निशितशरैर्विभिद्यमान -
त्वचि विलसत्कवचेऽस्तु कृष्ण आत्मा ॥ 3 ॥

सपदि सखिवचो निशम्य मध्ये
निजपरयोर्बलयो रथं निवेश्य।
स्थितवति परसैनिकायुरक्ष्णा
हृतवति पार्थसखे रतिर्ममास्तु ॥ 4 ॥

व्यवहितपृतनामुखं निरीक्ष्य
स्वजनवधाद्विमुखस्य दोषबुद्ध्या।

कुमतिमहरदात्मविद्यया यः
    चरणरतिः परमस्य तस्य मेऽस्तु ॥ **5** ॥

स्वनिगममपहाय मत्प्रतिज्ञा -
    मृतमधिकर्तुमवप्लुतो रथस्थः।
धृतरथचरणोऽभ्ययाच्चलद्गु -
    र्हरिरिव हन्तुमिभं गतोत्तरीयः ॥ **6** ॥

शितविशिखहतो विशीर्णदंशः
    क्षतजपरिप्लुत आततायिनो मे।
प्रसभमभिससार मद्वधार्थं
    स भवतु मे भगवान् गतिर्मुकुन्दः ॥ **7** ॥

विजयरथकुटुम्ब आत्ततोत्रे
    धृतहयरश्मिनि तच्छ्रियेक्षणीये।
भगवति रतिरस्तु मे मुमूर्षो -
    र्यमिह निरीक्ष्य हता गताः स्वरूपम् ॥ **8** ॥

ललितगतिविलासवल्गुहास -
    प्रणयनिरीक्षणकल्पितोरुमानाः।
कृतमनुकृतवत्य उन्मदान्धाः
    प्रकृतिमगन् किल यस्य गोपवध्वः ॥ **9** ॥

मुनिगणनृपवर्य सङ्कुलेऽन्त -
    स्सदसि युधिष्ठिर राजसूय एषाम्।
अर्हणमुपपेद ईक्षणीयो
    मम दृशिगोचर एष आविरात्मा ॥ **10** ॥

तमिममहमजं शरीरभाजां
हृदि हृदि धिष्ठितमात्मकल्पितानाम्।
प्रतिदृशमिव नैकधार्कमेकं
समधिगतोऽस्मि विधूतभेदमोहः॥ **11** ॥

सूत उवाच
कृष्ण एवं भगवति मनोवाग्दृष्टिवृत्तिभिः।
आत्मन्यात्मानमावेश्य सोऽन्तः श्वास उपारमत्॥ **12** ॥

॥ इति श्री भीष्मस्तुतिः समाप्ता ॥